# Pitha Stotram

# પીઠસ્તોત્રમ્

## Document Information

Text title : Pitha Stotram

File name : pIThastotram2.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# પીઠસ્તોત્રમ્

દેવા દેવેશ્વરાદ્યાશ્ચ ઋષયો ઋષિસત્તમાઃ ।
પૃથગેવોપદેષ્ટારસ્તેષાં પીઠં પૃથક્ પૃથક્ ॥ ૧॥

મનુષ્યેશ્વરાવતારા યે આચાર્યા મુરવૈરિણઃ ।
પારમ્પર્યાગતં તેષાં પીઠમેકં વિશિષ્યતે ॥ ૨॥

યથા મહીભૃતાં પીઠં જગતાં પાલનાય વૈ ।
તથૈવાદેશિકાનાં ચ પીઠં ધર્મપ્રવૃત્તયે ॥ ૩॥

પીઠસ્થ એવ ભૂપાલો યથા ન્યાયપ્રવર્તકઃ ।
તથા પીઠસ્થિતાચાર્યો યોગ્યો ધર્મપ્રવૃત્તયે ॥ ૪॥

પીઠસ્થિતો યથા રાજા માન્યો દેવૈર્નરૈરપિ ।
તથા પીઠસ્થિતાચાર્યઃ પૂજ્યઃ સ્યાન્ન વિના ચ તમ્ ॥ ૫॥

યદા વિલુપ્યતે પીઠં પારમ્પર્યક્રમાગતમ્ ।
દેશકાલપ્રમાદાદ્યૈસ્તદા નૂત્નં વિધીયતે ॥ ૬॥

દેવર્ષીણાં ચ પૂર્વેષાં મન્ત્રં વા નામમન્ત્રકમ્ ।
સંયોજ્ય પીઠમન્ત્રેણ પીઠં સંસ્થાપયેત્સુધીઃ ॥ ૭॥

રાજપીઠાઙ્ગવદ્રાજપીઠાઙ્ગૈઃ પીઠમર્ચયેત્ ।
અથવા ભાવનામાત્રૈઃ પૂર્વોક્તં વા યથેપ્સિતમ્ ॥ ૮॥

અથવા સપ્તદશભિર્યન્ત્રૈર્મન્ત્રૈર્નિરૂપિતમ્ ।
સંરાડાચાર્યપીઠં સ્યાત્સમર્ચ્યં નિત્યમેવ તત્ ॥ ૯॥

તસ્ય દક્ષિણપાર્શ્વે તુ કુર્યાદ્યન્ત્રચતુષ્ટયમ્ ।
તત્ત્વતત્ત્વેશર્ષિદેવૈરુપદેવૈસ્તદિષ્યતે ॥ ૧૦॥

વામે પાર્શ્વે ચતુર્યન્ત્રી કુર્યાત્સાધકસત્તમઃ ।
સ્વરૈર્વર્ણૈર્મન્ત્રબીજૈઃ પદૈર્માનસ્ય સમ્ભવાત્ ॥ ૧૧॥

પુરતઃ પદકે તત્ર પુનર્યન્ત્રચતુષ્ટયમ્ ।
ગાયત્ર્યા નિગમાનાં ચ તથા વૈ શાસ્ત્રમન્ત્રયોઃ ॥ ૧૨॥

મધ્યે સિદ્ધિનિધીયન્ત્રમાસનં તત્ર કલ્પયેત્ ।
ગોપાલયન્ત્રરાજં ચ પૃષ્ઠે તસ્યાગ્રતો ભવેત્ ॥ ૧૩॥

સઙ્ખ્યાયન્ત્રં ચાઙ્કયન્ત્રં પૃષ્ઠે પીઠસ્ય પૃષ્ઠતઃ ।
અધર્મચક્રં ચક્રસ્યાધસ્થં મૂર્ધ્નિ ગુરુર્વિશેત્ ॥ ૧૪॥

ગોપાલોપાસકાનાં ચ એતત્સિંહાસનં મતમ્ ।
સૌવર્ણં રાજતં તામ્રં કાષ્ઠમાશ્મં ચ મૃન્મયમ્ ॥ ૧૫॥

અસમ્ભવે ભાવનૈવ મન્ત્રાદીનાં વિધીયતે ।
ઉત્સેધઃ પરિણાહશ્ચ શાસ્ત્રતો વાપ્યભીપ્સિતઃ ॥ ૧૬॥

આચાર્યકુલસમ્ભૂત આચાર્યગુણસંશ્રયઃ ।
સ્થિત્વૈવ તત્ત્વમાચાર્યા યોગ્યો વ્યાખ્યોપદેશયોઃ ॥ ૧૭॥

સમૃદ્ધયોઽસ્ય વર્દ્ધન્તે પ્રતાપોઽસ્ય યતો મહાન્ ।
આચાર્યતો હરેર્ભક્તિર્વિરક્તિરપિ જાયતે ॥ ૧૮॥

એતત્સિંહાસનં દિવ્યં રાજ્ઞા શિષ્યૈશ્ચ સમ્મતૈઃ ।
પૂજિતં મનનીયં સ્યાદાચાર્યઃ સામ્પ્રદાયિકઃ ॥ ૧૯॥

વ્યાસસિંહાસનં ચાન્યદ્દીયતે ઋષિભિર્દ્વિજૈઃ ।
રોમહર્ષણયે યદ્વચ્છાસ્ત્રવ્યાખ્યાકૃતેઽર્પિતમ્ ॥ ૨૦॥

સંશ્રયેદ્ બ્રાહ્મણો વિદ્વાન્સૂતો નૈવ વિલોમજઃ ।
મન્ત્રયોઃ પ્રાતિલોમ્યેન મખેં જાતસ્તથોચ્યતે ॥ ૨૧॥

વિનન્દન્નિજકાણ્ડાર્થં પાઞ્ચરાત્રં સદાગમમ્ ।
વદન્ સ્વસંહિતાં ગર્વાજ્જજ્ઞે સઙ્કર્ષણશ્ચ તમ્ ॥ ૨૨॥

આચાર્યં માનયેદ્ધીમાન્મનસા કર્મણા ગિરા ।
પઞ્ચાક્ષરી મહામન્ત્રયન્ત્રં સ્થિત્વા સ્વયં હરિઃ ॥ ૨૩॥

ઇત્થં પીઠસ્ય માહાત્મ્યં જ્ઞાત્વા પીઠં સમાશ્રિતમ્ ।
રાધિકાયૈ દદૌ પૂર્વં લલિતાયૈ ચ સા દદૌ ॥ ૨૪॥

સા મહ્યમદદાદ્ દેવી વાગીશાય સદસ્પતિઃ ।
સઙ્કલ્પમસ્ય સઙ્કલ્પ્ય ચરિતં ચ મહાત્મનામ્ ॥ ૨૫॥

પઞ્ચાક્ષરં ચાષ્ટવર્ણં તથૈવાષ્ટાદશાક્ષરમ્ ।
નારાયણાય શેષાય સ દદૌ ત્રિપુરારયે ॥ ૨૬॥

દશાર્ણેન ચ સંયુક્તાન્સોઽદાન્મન્ત્રાન્સુરર્ષયે ।
દ્વાદશાર્ણેન સંયુક્તાન્તાન્ વ્યાસાય દદાવસૌ ॥ ૨૭॥

નમઃ પીઠાય મહતે આચાર્યાય નમો નમઃ ।
ઉપદેશાય મન્ત્રેભ્યઃ શિષ્યેભ્યશ્ચ નમો નમઃ ॥ ૨૮॥

છત્રાયામૃતવર્ષાય વારણાયાતપસ્ય ચ ।
નમશ્ચામરયુગ્માય શઙ્ખયુગ્માય વૈ નમઃ ॥ ૨૯॥

વાદિત્રેભ્યો નમસ્તસ્ય દરારિભ્યાં નમો નમઃ ।
જ્યોતિર્યુગ્માયાન્ધકારમર્દનાય નમો નમઃ ॥ ૩૦॥

માયૂરહસ્તકદ્વન્દ્વસ્વર્ણવેત્રયુગં નમઃ ।
રૂપ્યં વેત્રયુગં ભવ્યં હરિવક્ત્રચતુષ્ટયમ્ ॥ ૩૧॥

આર્યસિંહાસનં વન્દે કેતુધ્વજવિરાજિતમ્ ।
નીરાજમાનં યઃ પશ્યેત્પ્રણમેત્સ હરિં વ્રજેત્ ॥ ૩૨॥

(૫૬-૮૭)

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે તુરીયાંશે
સામ્પ્રદાયિકસ્તોત્રનિરૂપણં નામૈકાદશોઽધ્યાયે પીઠસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

*Pitha Stotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*